# Vaidyanathamahatmyavarnanam

# વૈદ્યનાથમાહાત્મ્યવર્ણનમ્

## Document Information

Text title : Vaidyanathamahatmyavarnanam

File name : vaidyanAthamAhAtmyavarNanam.itx

Category : shiva, mAhAtmya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vaidyanAthasthalamAhAtmya | dvAdasho.adhyAyaH | 12.1-39||

Latest update : February 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# વૈદ્યનાથમાહાત્મ્યવર્ણનમ્

વન્દે જટાયુનગરીં વન્દે સિદ્ધામૃતં સરઃ ।
વન્દે કલ્પકવિઘ્નેશં વન્દે શઙ્ખવનોદ્ભવમ્ ॥

વન્દે શ્રીવૈદ્યનાથેશં ભવરોગચિકિત્સકમ્ ।
વન્દે શ્રીગન્ધકણ્ઠીં વન્દે બાલામ્બિકામુમામ્ ॥

ઋષિ અગસ્ત્ય ઉવાચ ।

ભૂયો વક્ષ્યામિ માહાત્મ્યં વૈદ્યનાથસ્ય શૂલિનઃ ।
શ‌ૃણ્વતાં પઠતાં પુંસામાયુરારોગ્યદાયકમ્ ॥ ૧॥

વૈદ્યનાથસ્ય પૂર્વસ્યાં દિશિ મન્નામતીર્થકમ્ ।
પુણ્યં ચકાસ્તિ પાપઘ્નં તત્તીર્થસ્નાનમાત્રતઃ ॥ ૨॥

સિધ્યેત્ કલ્યાણમાગ્નેય્યાં બ્રહ્મકુણ્ડમિતિ શ્રુતમ્ ।
તત્ર સ્નાત્વા મહાપુણ્યે યદ્દદ્યાદણુમાત્રકમ્ ॥ ૩॥

તત્સર્વં કોટિગુણિતં સ્નાનં દાનં શિવાર્ચનમ્ ।
ભિષગીશસ્ય નૈરૃત્યાં કોદણ્ડતટિની વરા ॥ ૪॥

રામતીર્થમિતિ ખ્યાતં મહાપાપહરં નૃણામ્ ।
વૈદ્યનાથસ્ય નિકટે દક્ષિણે પરમાદ્ભુતમ્ ॥ ૫॥

સિદ્ધામૃતમિતિ ખ્યાતં કલૌ સર્વાર્થસિદ્ધિદમ્ ।
મૃત્તિકાં ગૃધ્રકુણ્ડસ્ય વૈદ્યનાથાભિષેકજૈઃ ॥ ૬॥

ગન્ધોદકૈઃ પઞ્ચગવ્યૈઃ મર્દયિત્વા સમાહિતાઃ ।
યે લેપયેયુર્ભક્ત્યા ચ શ્વેતકુષ્ઠાદિ રોગતઃ ॥ ૭॥

ક્ષુદ્રદોષૈર્વિનિર્મુક્તા દિવ્યદેહાશ્ચ સુન્દરાઃ ।
ગન્ધર્વરૂપસદૃશા મહાપાપૈર્વિવર્જિતાઃ ॥ ૮॥

આરોગ્યં બલમાયુષ્યં દીર્ઘમાયુરવાપ્નુયુઃ ।

દેશાન્તરસ્થિતો યો વા ગૃધ્રઋક્ષસ્કન્દનામકે ॥ ૯॥

મણિમન્ત્રૌષધાત્ કુણ્ડાત્ મૃદમાદાય ભક્તિતઃ ।
ધૃત્વા ક્ષુદ્રાદિરોગેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૧૦॥

ગૃધ્રસ્ય ગૃધ્રકુણ્ડસ્ય દર્શનં ભાગ્યસિદ્ધયે ।
જ્વરાદિભિઃ પીડિતોઽપિ તથા કુષ્ઠાદિભિવૃતઃ ॥ ૧૧॥

અપસ્મારાદિભિશ્ચૈવ ભૂતપ્રેતાદિભિસ્તથા ।
અન્યૈઃ ક્ષુદ્રાદિસઙ્ઘૈશ્ચ સંવૃતઃ પીડિતોઽપિ વા ॥ ૧૨॥

તેભ્યાં વિમુચ્યતે સદ્યઃ ગૃધ્રકુણ્ડસ્ય દર્શનાત્ ।
વૈદ્યનાથસ્થલે પુણ્યે રુદ્રાક્ષં ધારયન્નરઃ ॥ ૧૩॥

વિભૂતિં ધારયન્ ધીમાન્ શિવપૂજાં કરોતિ યઃ ।
સર્વોપદ્રવસઙ્ઘતૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૧૪॥

કૃષ્ણશ્રીગન્ધકણ્ઠીં યે વૈદ્યનાથં પ્રદક્ષિણમ્ ।
યે કારયન્તિ કુર્વન્તિ તેષાં વક્ષ્યે ફલં દ્વિજાઃ ॥ ૧૫॥

અશ્વમેધસહસ્રસ્ય પ્રાપ્નુવન્તિ ફલં ધ્રુવમ્ ।
વૈદ્યનાથસ્થલે પુણ્યે પુણ્યારામં મહેશિતુઃ ॥ ૧૬॥

યઃ કરોતિ નરો ભક્ત્યા ચેહાભીષ્ટમવાપ્ય સઃ ।
કૈલાસભાગે વાસો વા દેવેન્દ્રત્વં ભવેત્ ધ્રુવમ્ ॥ ૧૭॥

ભિષગીશપુરે યજ્ઞં યે કુર્વન્તિ દ્વિજોત્તમાઃ ।
તેઽવાપ્ય સકલાન્ કામાન્ વ્રજેયુઃ શામ્ભવં પદમ્ ॥ ૧૮॥

શિવરાત્રવ્રતાદીનિ વૈદ્યનાથસ્થલે દ્વિજાઃ ।
યે કુર્વન્તિ નરા ભક્ત્યા તેષાં વક્ષ્યે ફલાદિકમ્ ॥ ૧૯॥

ક્ષુદ્રરોગવિનિર્મુક્તાસ્સર્વરોગવિવર્જિતાઃ ।
અવાપ્ય સકલાન્ કામાન્ વ્રજેયુઃ શાઙ્કરં પદમ્ ॥ ૨૦॥

વૈદ્યનાથસ્થલે પુણ્યે યા દદાતિ દ્વિજાતયે ।
અન્નદાનં રસોપેતં શ્રદ્ધાભક્તિયુતો નરઃ ॥ ૨૧॥

તસ્ય પુણ્યફલં વક્તું ન શક્નોમિ મુનીશ્વરાઃ ।
વૈદ્યનાથસ્થલે પુણ્યે કન્યાદાનં કરોતિ યઃ ॥ ૨૨॥

પુત્રપૌત્રૈઃ પરિવૃતઃ સાર્વભૌમો ભવેદ્ધ્રુવમ્ ।
સસ્યયુક્તાં ધરાં તત્ર વૈદ્યનાથસ્થલે નરઃ ॥ ૨૩॥

યો દદાતિ દરિદ્રાય બ્રાહ્મણાય મહાત્મને ।
સપ્તસાગરપર્યન્તભૂમિદાનસ્ય યત્ફલમ્ ॥ ૨૪॥

તત્ફલં પ્રાપ્ય તેજસ્વી સોઽન્તે શિવપદં વ્રજેત્ ।
વૈદ્યનાથસ્થલે પુણ્યે પ્રપાદાનં કરોતિ યઃ ॥ ૨૫॥

અશ્વમેધફલં પ્રાપ્ય શિવસાયુજ્યમાપ્નુયાત્ ।
દુકૂલં વ્યજનં છત્ર શિવિકામમ્બરં તથા ॥ ૨૬॥

કિરીટં ભૂષણં ચૈવ વૈદ્યનાથસ્થલેઽમલે ।
શ્રીગન્ધકુસુમં દિવ્યં મૃગનાભિં ચ ચન્દનમ્ ॥ ૨૭॥

ગોદાનમશ્વદાનં વા ગજદાનં ચ કમ્બલમ્ ।
મરીચિદશદાનાનિ યે કુર્વન્તિ દ્વિજાતયે ॥ ૨૮॥

તેષાં પુણ્યફલં વક્તું સહસ્રવદનોઽક્ષમઃ ।
શ્વેતારણ્યે ચ કેદારે ગજારણ્યે વટાલયે ॥ ૨૯॥

રામેશે કુમ્ભઘોણે ચ ગોકર્ણે ચિત્સભાસ્થલે ।
વિરૂપાક્ષોઽર્જુનગ્રામે ત્યાગરાજપુરે વરે ॥ ૩૦॥

શ્રીશૈલે ચમ્પકારણ્યે વેદારણ્યસ્થલે દ્વિજાઃ ।
મહાદાનસહસ્રાણિ યત્કૃત્વા ફલમાપ્નુયાત્ ॥ ૩૧॥

તત્ફલં વૈદ્યનાથેઽસ્મિન્ નિષ્કમાત્રસ્ય દાનતઃ ।
યઃ કરોતિ નરો ભક્ત્યા ચાભિષેકં સમાહિતઃ ॥ ૩૨॥

આરાધનશતં ક્ષીરૈર્દધિભિશ્ચ સહસ્રકમ્ ।
ઘૃતાભિષેકૈસ્સ્યુતમપરાધં સહેચ્છિવઃ ॥ ૩૩॥

પઞ્ચામૃતૈઃ પઞ્ચગવ્યૈઃ યે કુર્વન્ત્યભિષેચનમ્ ।
પઞ્ચપાતકસન્ધ્વૈસ્તે મુચ્યન્તે નાત્ર સંશયઃ ॥ ૩૪॥

ગન્ધાભિષેકસ્સમ્યક્ ભુક્ત્વા ભોગાનનેકશઃ ।
તતઃ કૈલાસપદવીં પ્રાપ્નુયુર્મુનિસત્તમાઃ ॥ ૩૫॥

યે વાધ્યમાનાઃ ક્ષુદ્રૈશ્ચ શ્વેતકુષ્ઠાદિભિસ્તથા ।
વૈદ્યનાથં સમભ્યર્ચ્ય બિલ્વૈસ્સાહસ્રનામકૈઃ ॥ ૩૬॥

મુક્તાસ્સ્યુઃ નાત્ર સન્દેહઃ સત્યં સત્યં વદામ્યહમ્ ।
બહુનાત્ર કિમુક્તેન ભવન્તોऽપિ મહાત્મનઃ ॥ ૩૭॥

પૂજયધ્વં મહાદેવં વૈદ્યનાથં મહેશ્વરમ્ ।
સ્તુત્વા ચ વિવિધૈસ્તોત્રૈઃ પ્રાર્થયિત્વા મનોરથાન્ ॥ ૩૮॥

તત્રોષિત્વા ત્રિરાત્રં ચ ભોગાન્ ભુઞ્જત હે દ્વિજાઃ ।
ઇત્યગસ્ત્યોદિતાન્ ધર્માન્ સર્વપાપપ્રણાશનાન્ ॥ ૩૯॥

॥ ઇતિ વૈદ્યનાથસ્થલમાહાત્મ્યે વૈદ્યનાથમાહાત્મ્યવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ વૈદ્યનાથસ્થલમાહાત્મ્યમ્ । દ્વાદશોऽધ્યાયઃ । ૧૨.૧-૩૯॥

- .. vaidyanAthasthalamAhAtmyam . dvAdasho.adhyAyaH . 12.1-39..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય describes the merits of visiting and conducting of certain rites at the several specific places (e.g. Agastyaṭīrtha અગસ્ત્યતીર્થ, Rāmatīrtha રામતીર્થ, Gṛdhrakuṇḍa ગૃધ્રકુણ્ડ etc.) located in the Vaidyanātha Sthala વૈદ્યનાથ સ્થલ.

Encoded and proofread by Ruma Dewan

*Vaidyanathamahatmyavarnanam*
pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*